कर्म्मणि ल्युट् ।) दधिमन्थनदण्डः । तत्पर्य्यायः । वैशाखः २ दधिचारः ३ तक्राटः ४ । इति हारावली । हस्तघर्षणे स्त्री ॥

करघर्षी, [न्] पुं, (कराभ्यां करयोर्वा घर्षः घर्षणं अस्ति अस्यास्मिन् वा । करघर्ष + इनिः ।) मन्थानदण्डः । इति शब्दमाला ॥

करङ्कः, पुं, (कस्य रङ्क इव ।) मस्तकम् । (कीर्य्यते जलमत्र इति करः । कृ + अप् । जलक्षेपः अङ्को गर्भो यस्य शकन्ध्वादित्वात् अलोपे साधुः ।) अशस्यनारिकेलफलास्थि । इति मेदिनी । नारिकेलेर खोल इति भाषा ॥ शरीरास्थि । इति हेमचन्द्रः ॥ इक्षुभेदः । इति राजनिर्घण्टः ॥ (पात्रविशेषः । यथा, "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी ॥)

करङ्कशालिः, पुं, (करङ्क इति नाम्ना शालते शोभते इति । करङ्क + शाल + इन् ।) करङ्कनामेक्षुः । इति राजनिर्घण्टः ॥

करच्छदः, पुं, (करवत् आवरणकारी छदो यस्य ।) शाखोटवृक्षः । शेओड़ा इतिभाषा ॥ इति भावप्रकाशः । (अस्य गुणादिकं शाखोटशब्दे द्रष्टव्यम् ॥)

करच्छदा, स्त्री, (कर इव किरण इव लोहितवर्णः छदः पुष्पं यस्याः । कर इव आवरकश्छदो वा यस्याः ।) सिन्दूरपुष्पीवृक्षः । इति राजनिर्घण्टः ॥

करजं, क्ली, (करे जायते इति । कर + जन् + ड । व्याघ्रनखवदस्याकृतेस्तथात्वम् ।) व्याघ्रनखनामगन्धद्रव्यम् । इत्यमरः ।२।४।१२९॥ (नखीशब्देऽस्य गुणा वक्तव्याः ॥)

करजः, पुं, (कं सुखं जलं वा रञ्जयतीति । रञ्जेः कर्म्मण्यण् ।) करञ्जवृक्षः । ("करञ्जकः स्यात् करजः नक्तमालो नक्ताह्वयः" । इति शब्दरत्नावली ॥ करे जायते इति । जन + ड ।) नखः । इति मेदिनी ॥ (यथा, मनुः । ४ । ७० ।
"न कर्णोत्पाटनं कुर्य्यान्न छिन्द्यात् करजैस्तृणम्" ॥)

करजाख्यः, पुं, (करजस्याख्या एव आख्या यस्य ।) नखीनामगन्धद्रव्यम् । इति रत्नमाला ॥

करञ्जोड़िः, पुं, हस्तञ्जोड़िवृक्षः । इति राजनिर्घण्टः ॥ (केचित् करजोड़िरिति वदन्ति ॥)

करञ्जः, पुं, (कं सुखं शिरो जलं वा रञ्जयतीति । क + रञ्ज + णिच् + अण् ।) स्वनामख्यातवृक्षविशेषः । करमचा इति भाषा । तत्पर्य्यायभेदौ यथा,—

"करञ्जकः स्यात् करजः नक्तमालो नक्ताह्वयः ।
अङ्गारमञ्जी षड्ग्रन्थो मर्कटाङ्गारवल्लरी ।
करञ्जभेदाश्चत्वारो विज्ञेया लोकतस्त्विमे" ॥

इति शब्दरत्नावली । अपि च ।

"चिरबिल्वो नक्तमालः करजश्च करञ्जकः ।
सोमवल्कः कलिङ्गस्तु पूतिकः कलिकारकः ॥
प्रकीर्य्यः पूतिकरजः पट्टिजः सुमना अपि ।
करञ्जभेदाः षड्ग्रन्थो मर्कटाङ्गारवल्लरी" ॥

इति जटाधरः । स बहुविधः । तत्र इरकरञ्जपर्य्यायः । नक्तमालः २ पूतिकः ३ चिरबिल्वकः ४ पूतिपर्णः ५ वृद्धफलः ६ रोचनः ७ । इति राजनिर्घण्टः ॥ चिरबिल्वः ८ करजः ९ करञ्जकः १० । इत्यमरः । २ । ४ । ४७ ॥ चिरिबिल्वः ११ । इति तट्टीका ॥ उदकीर्य्यः १२ । इति रत्नमाला ॥ * ॥ अस्य फलगुणाः । कटुत्वम् । उष्णत्वम् । चक्षुर्हितत्वम् । वातनाशित्वञ्च । इति राजनिर्घण्टः ॥ वातकफमेहतन्द्राकृमिकुष्ठनाशित्वञ्च ॥ * ॥ तत्पत्रगुणाः । कफवातार्शःकृमिशोथनाशित्वम् । भेदकत्वम् । पाके कटुत्वम् । वीर्य्योष्णत्वम् । पित्तवर्द्धकत्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥ * ॥ तत्तैलगुणाः । अतिस्निग्धत्वम् । वातनाशित्वम् । स्थिरदीप्तिदात्वम् । नयनामयवातरोगकुष्ठकण्डूविस्फोटिकानाशित्वम् । तीक्ष्णत्वम् । उष्णत्वम् । लेपेन नानाविधचर्म्मदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ किटिभत्वम् । कृमिनाशित्वम् । रक्तपित्तदोषकारित्वञ्च । इति राजवल्लभः ॥ * ॥ अथ नाटाकरञ्जपर्य्यायः । प्रकीर्य्यः १ पूतिकरजः २ पूतिकः ३ कलिकारकः ४ । इत्यमरः २।४।४८ ॥ पूतीकरञ्जः ५ सकण्टकः ६ । इति रत्नमाला ॥ * ॥ षड्ग्रन्थः । काँटाकरञ्ज गाँटिया करञ्ज इति भाषा ॥ * ॥ मर्कटी । माकड़ाकरञ्ज इति भाषा ॥ * ॥ अङ्गारवल्लरी । इत्यमरभरतौ विषकरञ्ज इति भाषा ॥ * ॥ अथ अम्लकरञ्जपर्य्यायः ॥ करमर्द्दी १ वनेक्षुदा २ कराम्लः ३ करमर्द्दकः ४ । इति रत्नमाला ॥ कृष्णपाकफलः ५ अविग्नः ६ सुषेणः ७ । इत्यमरः ।२।४।६७ ॥ अस्य फलगुणाः । पिपासानाशित्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ करमर्द्दकशब्दे द्रष्टव्यौ ॥

(यथा, महाभारते ३ । २२९ । ३५ ।

"पादपानाञ्च या माता करञ्जनिलया हि सा ।
वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी ।
करञ्जे तां नमस्यन्ति तस्मात् पुत्रार्थिनो नराः" ॥

किरति विक्षिपति धार्म्मिकानिति । कॄ विक्षेपे + बाहुलकादौणादिकोऽञ्जन्प्रत्ययः । धर्म्मद्वेष्टरि, त्रि । यथा ऋग्वेदे । १ । ५३ । ८ ।

"त्वं करञ्जमुत पर्णयं वधी-
स्तेजिष्ठयातिथिग्वस्य वर्त्तनी" ॥)

करञ्जकः, पुं, (करञ्ज + स्वार्थे कन् ।) करञ्जवृक्षः । इत्यमरः ।२।४।४७॥ भृङ्गराजवृक्षः । इति जटाधरः ॥ (यथा महाभारते । १३ । १२८ । ८ ।

"यस्तु संवत्सरं पूर्णं दद्याद्दीपं करञ्जके ।
सुवर्च्चलामूलहस्तः प्रजास्तस्य विवर्द्धते" ॥)

करञ्जफलकः, पुं, (करञ्जफलमिव फलं यस्य । ततः स्वार्थे कन् । करञ्जफलमिव कायते इति वा । कै + कः ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥

करटः, पुं, (कं कुत्सितं रटति शब्दं करोतीति । रट शब्दे + पचाद्यच् ।) काकः । (यथा गङ्गास्तोत्रे ।
"वरमिह गङ्गातीरे सरटः करटः ।" इति ॥
किरति विक्षिपति मदवारि इति । कॄ + अटन् ।) हस्तिगण्डः । इत्यमरः । ३ । ३ । ३४ । (यथा महाभारते । ३ । २७७ द्रौपदीहरणपर्व्वणि १८ ।

"कथं हि भिन्नकरटं पद्मिनं वनगोचरम् ।
उपस्थाय महानागं करेणुः शूकरं स्पृशेत्" ॥)

कुसुम्भवृक्षः । निन्द्यजीवनः । एकादशाहादिश्राद्धम् । दुर्द्दुरूटः । नास्तिक इति यावत् । (अयं तु क्षत्रियभेदाभिप्रायेणोक्तः । तथा च महाभारते ६ । ९ । ६२ ।

"मालवा वह्नवाश्चैव तथैवापरवर्त्तकाः ।
कुलिन्दाः कालदाश्चैव दण्डकाः करटास्तथा" ॥)

वाद्यविशेषः । इति मेदिनी ॥

करटकः, पुं, (करट + स्वार्थे कन् ।) काकः । इति शब्दरत्नावली ॥ (पिङ्गलकनाम्नः सिंहस्य मन्त्रिपुत्रविशेषः शृगालः । यथा हितोपदेशे २।२५ ।
"स च तथाविधः करटकदमनकाभ्यां तन्मन्त्रिपुत्राभ्यां शृगालाभ्यां दृष्टः" ॥ स्तेयशास्त्रप्रवर्त्तकः कर्णीसुतः । यथा कादम्बरीटीका ।
"कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः" ॥)

करटा, स्त्री, (करट + "अजाद्यतष्टाप्" ।४।१।४। इति टाप् ।) दुःखदोह्या गवी । इति हेमचन्द्रः ॥

करटी, [न्] पुं स्त्री, (करटः मदक्षरणशीलगण्डः प्राशस्त्येन अस्ति अस्य । करट + इनिः ।) हस्ती । इति हेमचन्द्रः ॥ (यथा, लङ्केश्वरविरचितशिवस्तुतौ । ४ ।

"कपर्द्दिनि कुमुद्वतीरमणखण्डचूड़ामणौ
कटीतटपटाभवत्करटिचर्म्मणि ब्रह्मणि ॥)

करटुः, पुं, (कृ + अटुः ।) पक्षिविशेषः । इति हेमचन्द्रः । करकटिया इति भाषा ॥

करणं, क्ली, (क्रियतेऽनेन । कृ + करणे + ल्युट् ।) साधकतमम् । इत्यमरः । ३ । ३ । ५४ ॥ तत्तु षट्कारकान्तर्गतकारकविशेषः । तस्य लक्षणम् ।

"क्रियायां साध्यायां बहूनां कारणानां मध्ये कारणान्तरव्यवधानाभावे यद्वस्तु क्रियानिष्पत्तिकारणं विवक्षितं तस्मिन् करणत्वं प्रकीर्त्तितम् । तेन दात्रेण धान्यं लुनातीत्यत्र हस्तादेः कारणत्वेऽपि दात्रस्यैव करणत्वं विवक्षितम् ॥ तथाचोक्तम् ।
"कारणाव्यवधानेऽपि क्रिया निष्पत्तिकारणम् ।
यद्वै विवक्षितं तेषु करणत्वं प्रकीर्त्तितम्" ॥

इति मुग्धबोधटीकायां दुर्गादासः ॥ * ॥ तिथ्यर्द्धपरिमितववाद्येकादशसंज्ञककालविशेषः । तेषां नामानि । ववः १ वालवः २ कौलवः ३ तैतिलः ४ गरः ५ वणिजः ६ विष्टिः ७ शकुनिः ८ चतुष्पदः ९ किन्तुघ्नः १० नागः ११ । तेषां यथाक्रमेणाधिष्ठातृदेवाः । इन्द्रः १ कमलजः २ मित्रः ३ अर्य्यमा ४ भूः ५ श्रीः ६ यमः ७ कलिः ८ वृषः ९ फणी १० मारुतः ११ । एकैकस्मिन् तिथौ द्वे द्वे करणे भवतः । तेषां ववादयः सप्त अष्टावृत्त्या शुक्लप्रतिपच्छेषार्द्धमारभ्य कृष्णपक्षीयचतुर्द्दशीप्रथमार्द्धपर्य्यन्तं भवन्ति । शेषाश्चत्वारः कृष्णचतुर्द्दशीशेषार्द्धावधिशुक्लप्रतिपत्प्रथमार्द्धपर्य्यन्तं नियमेन भवन्ति अतो ध्रुवाणि करणानि । पूर्व्वे सप्ताध्रुवाणि ॥ तेषामानयनक्रमो यथा ।

"तिथिर्द्विघ्ना करोनागशिष्टाकरणमादिमे ।
परे दले तु सैकं तत्करणं ववपूर्व्वकम्" ॥

इति ज्योतिषम् ॥ * ॥ क्षेत्रम् । गात्रम् । इन्द्रि-